मांसभारं वहत्येव दिवानिशम्” कन्यादानफलं यथा “दशवापीसमा कन्या दीयते ब्राह्मणाय या। वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने। सन्ध्यावते वेदपाठकारिणे सत्यवादिने। अस्मै प्रदत्ता कन्या च दशवापीफलप्रदा। त्रिसन्ध्याकारिणे सत्यवादिने गृहशालिने। वेदज्ञाय च विप्राय दत्ताष्टफलदायिनी। प्रतिग्रहगृहीताय सन्ध्याहीनाय नित्यशः। मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी। परदारगृहीताय याजकाय द्विजाय च। शठाय सन्ध्याहीनाय वाप्येकफलदा सुता। त्यक्तसन्ध्याय गायत्रीविहीनाय शठाय च। विप्रोद्भवाय दत्ता सा वाप्यर्द्धफलदा सुता। पापिने शूद्रजाताय विप्रक्षेत्रोद्भवाय च। दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा। विष्णुभक्ताय विदुषे विप्राय सत्यवादिने। जितेन्द्रियाय दत्ता या त्रिंशद्वापीफलप्रदा। षष्टिवर्षसहस्राणि दिव्यरूपं विधाय च। एवम्भूताय दत्त्वा च मोदते विष्णुमन्दिरे। दत्त्वा कन्यां सुशीलाञ्च हराय हरयेऽथ वा। नारायणस्वरूपञ्च भवेदेव श्रुतौ श्रुतम्। विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये। स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्भवाय च” ब्रह्म०वै०प्र०ख०।

**दु(दो)ह्य** त्रि० दुह—गौणे कर्मणि वा क्यप् पक्षे ण्यत्। १दोहनगौणकर्मणि गव्यादौ गौणकर्माविवक्षायां दोहनप्रधानकर्मणि २दुग्धादौ च।

**दु(द्रु)ह्यु** पु० शर्मिष्ठायां जाते ययातिपुत्रभेदे। “अन्वगृह्णात् प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे समुदिता गुणैः। देवयान्यां महाराज! शर्मिष्ठायाञ्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे” भा० आ० ७५ अ० हरिवंशे तु ३० अ० द्रुह्युरिति अणुरिति पाठः। लिपिकरप्रमादात् द्विधा पाठः “तथा ययातिः पञ्चानां विजित्य वसुधामिमाम्। देवयानीमुशनसः सुतां भार्य्यामवाप सः। शर्मिष्ठामासुरीञ्चैव तनयां वृषपर्वणः। यदुञ्च तुर्वसुञ्चैव देवयानी व्यजायत। द्रुह्युञ्चाणुञ्च पूरुञ्च शर्मिष्ठा वार्षपार्वणी”।

तस्य राज्यदेशस्य तत्रैव अ० उक्तो यथा

“सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागराम्। व्यभजत् पञ्चधा राजा पुत्राणां नाहुषस्तदा। दिशि दक्षिणपूर्वस्यां तुर्वसुं मतिमान्नृपः। प्रतीच्यामुत्तरस्याञ्च द्रुह्युञ्चानुञ्च नाहुषः। दिशि पूर्वोत्तरस्यान्तु यदुं ज्येष्ठं न्ययोजयत्। मध्ये पूरुञ्च राजानमभ्यषिञ्चत् स नाहुषः। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। यथाप्रदेशमद्यापि धर्मेण परिपाल्यते”। तद्वंशवर्णनञ्च तत्रैव ३२ अ० यथा “द्रुह्योश्च तनयो राजन्! बभ्रुः सेतुश्च पार्थिवः। अङ्गारः सेतुपुत्रश्च मरुतां पतिरुच्यते। यौवनाश्वेन समरे कृच्छ्रेण निहतो बली। युद्धं सुमहदस्यासीन् मासान् परि चतुर्दश। अङ्गारस्य तु दायादो गान्धारो नाम पार्थिवः। ख्यायते यस्य नाम्ना वै गान्धारविषयो महान्। गान्धारदेशजाश्चैव तुरगा वाजिनां वराः” तस्य पितुर्ययातेर्जराया अग्रहणे शापकथा भा० आ० ८४ अ० “ययातिरुवाच। “यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्माद्द्रुह्यो! प्रियः कामो न ते सम्पत्स्यते क्वचित्। यत्राश्वरथमुख्यानामश्वानां स्याद्गतं न च। हस्तिनां पीठकानाञ्च गर्दभानान्तथैव च। वस्तानाञ्च गवाञ्चैव शिविकायास्तथैव च। उडुपप्लवसन्तारो यत्र नित्यं भविष्यति। अराजशब्दभाजस्तं तत्र प्राप्स्यसि सान्वयः”

**दू** खेदे दिवा०आत्म०अक०सेट्। दूयते अदविष्ट। दुदुवे। ओदित् दूनः कविकल्पद्रुमः पा० दुनोतेरेव नत्वदीर्घौ इति भेदः। “त्वया हीनं विधातर्मां कथं पश्यन् न दूयसे” रघुः। “न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति” माघः। उपतप्तीकरणे सक०, “दूयते दीनं खलजनः” दुर्गादासः।

**दूडभ** त्रि० दुःखेन दभ्यतेऽसौ दुर्+दभ—कर्मणि खल्। “दुरो दाशनाशदभध्येषूत्त्वमुत्तरपदादेष्टुत्वञ्च” पृषो० पा० गणसूत्रेणोक्तकर्म नि० नलोपः। दुःखेन दम्भनीये

**दूडाश** त्रि० दुःखेन दाश्यते दुर्+दाश—कर्मणि खल्। दूडभशब्दोक्त पा०ग० सूत्रेण सिद्धम्। दुःखेन हिंसनीये

**दूढी** त्रि० दुष्टं ध्यायति दुर्+ध्यै—चिन्तायां कर्त्तरि सम्प० भावे वा क्विप्। दूडभशब्दोक्तकार्यम् पा०ग० सूत्रे ध्यायतेर्धातोर्निर्देशात्। १दुष्टं ध्यायिनि २दुष्टायां बुद्धौ स्त्री “अस्माकं शंसो अभ्यस्तु दूढ्यः” ऋ० १।९४।८। “वधैर्दुःशंसा अप दूढ्यो जहि” ९)[ध्यम्। दुष्टं ध्यायिनि

**दूढ्य** त्रि० दुष्टं ध्यायति दुर्+ध्यै—क। दूडभशब्दवत् सा-

**दूणाश** त्रि० दुःखेन नाश्यते दुर्+नाशि—कर्मणि खल् दूडभशब्दवत् साध्यम्। १दुःखेन नाशनीये। “दूणाशेयं दक्षिणा पार्थिवानाम्” ऋ० ६।२७।२८ “दूणाशा दुर्नाशा केनापि नाशयितुमशक्या” भा० २चातुर्मास्याङ्गे तृतीये सप्तदशे उत्तरे यज्ञभेदे पु० “द्विनाम्नोत्तरो बकृहिरण्यो